# Arunachala Pancharatna Varttikam

# અરુણાચલપઞ્ચરત્નવાર્ત્તિકમ્

## Document Information

Text title : Arunachala Pancharatnam with Varttika

File name : aruNAchalapancharatnavArttikam.itx

Category : pancharatna, shiva, ramaNa-maharShi

Location : doc_shiva

Author : Shri Ramana Maharshi; varttikam by K.Lakshmana Sharma('WHO')

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : Hymn of 5 verses, with commentary. Ramanashrama publication

Acknowledge-Permission: Sri V.S. Ramanan, President, Sri Ramanasramam sriramanamaharshi.org

Latest update : June 13, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 13, 2024

*sanskritdocuments.org*

# અરુણાચલપઞ્ચરત્નવાર્ત્તિકમ્

મઙ્ગલમ્

સચ્ચિન્માત્રસ્વભાવાય નિત્યમુક્તાય શમ્ભવે ।
રમણાયાત્મનાથાય નમો ભગવતે સદા ॥ ૧॥

ગ્રન્થાવતરણમ્

તેનારુણાચલાખ્યસ્ય સ્વસ્વરૂપસ્ય પઞ્ચભિઃ ।
શ્લોકૈઃ કૃતા નુતિસ્તસ્યાઃ ક્રિયતે લઘુવાર્ત્તિકમ્ ॥ ૨॥

માણ્ડૂક્યોદિતમદ્વૈતં તુર્યાખ્યં નિષ્પ્રપઞ્ચકમ્ ।
સસાધનં સ્તુતાવસ્યામાત્મતત્ત્વં પ્રપઞ્ચ્યતે ॥ ૩॥

પ્રામાણ્યં યુજ્યતે હ્યસ્ય યતો વક્ત્યત્ર સદ્ગુરુઃ ।
નિત્યાનુભૂતમાત્મીયં તત્ત્વં શિવમનામયમ્ ॥ ૪॥

વેદેન ગુરુવાક્યાનાં પ્રામાણ્યં મન્યતાં જનઃ ।
મન્યામહે તુ વેદાનાં પ્રામાણ્યં ગુરુવાક્યતઃ ॥ ૫॥

સ્વસ્વરૂપે તુરીયાખ્યે સ્થિતો યસ્સ ભવેદ્ગુરુઃ ।
ઉપદેશસ્તદીયો યસ્સા સ્યાદુપનિષત્પરા ॥ ૬॥

વિહાય પ્રાયશો વાદાન્ પ્રામાણ્યાદ્વચસાં ગુરોઃ ।
સિદ્ધાન્તા એવ સઙ્ગૃહ્ય દીયન્તે હ્યત્ર વાર્ત્તિકે ॥ ૭॥

પ્રથમશ્લોકઃ

કરુણાપૂર્ણસુધાબ્ધે
    કબલિતઘનવિશ્વરૂપ કિરણાવલ્યા ।
અરુણાચલપરમાત્મ-
    ન્નરુણો ભવ ચિત્તકઞ્જસુવિકાસાય ॥

karuna - grace; apurna - overflowing fullness; sudha - ambrosia; abdhe - O ocean; kabalita - is swallowed; ghana - solid; viœva - universe; rupa - form; kirana - rays; avalya by series; arunachala - O Arunachala; paramatman - supreme spirit, supreme self; arunah - sun; 5bhava - be; chitta - mind; kañja - lotus; su - good, auspicious, well (i.e. complete or full); vikasaya - for the blossoming. O ocean of ambrosia, the overflowing fullness of grace! O Arunachala, supreme spirit, by [whose] series of rays the solid form of the universe is swallowed! Be the sun for the complete blossoming of [my] mind-lotus.

પ્રથમશ્લોકસ્યાનુવાદઃ

કૃપાસુધામ્બુધેઽરુણાચલ પ્રબોધભાસ્કર
સ્વચિત્સ્વરૂપતેજસા નિગીર્ણસર્વલોકક ।
હૃદમ્બુજાતકોશકપ્રફુલ્લતાવિધાયિનીં
પ્રભાં નિજાં પ્રસાર્ય ભોસ્તમો વિનાશયાન્તરમ્ ॥

O Sea of the Nectar of Grace, Arunachala, Sun of Pure Consciousness swallowing up (like darkness) all the worlds by your Light of Consciousness, destroy the darkness within by spreading Thy Light which makes the bud of the Heart-lotus full-blown.

વાર્ત્તિકમ્

હૃદમ્ભોજવિકાસાય પ્રથમે પ્રાર્થ્યતે શુભા ।
તત્કૃપાસ્વીયભક્તાનાં તત્સ્વરૂપત્વસિદ્ધયે ।
અત્રૈવ નિષ્પ્રપઞ્ચત્વં દિશ્યતે ચ પરાત્મનઃ ॥ ૮॥

અહમિત્યખિલસ્યાન્તર્ભાનં યત્ પરમાત્મનઃ ।
કરુણેત્યુચ્યતે સૈવ નાદ્વૈતે વિક્રિયા યતઃ ॥ ૯॥

કરુણાયાઃ સ્વરૂપત્વમિષ્ટં ન ગુણતા વિભોઃ ।
ઉચ્યતે નિર્ગુણત્વં હિ વેદાન્તૈઃ પરમાત્મનઃ ॥ ૧૦॥

તયા ગૃહીતા યે ભક્તાઃ પ્રેમિણો વા વિચારિણઃ ।
સ્વરૂપાનુભવસ્તેષાં ધ્રુવો હ્યજ્ઞાનનાશતઃ ॥ ૧૧॥

નિષ્પ્રપઞ્ચકમદ્વૈતં તુર્યં સત્યમિતિ સ્ફુટમ્ ।
જગત્કબલનસ્યોક્ત્યા પૂર્વાર્ધે ગુરુણોચ્યતે ॥ ૧૨॥

અધિષ્ઠાનતયા તસ્ય વિશ્વસ્યારોપિતત્વતઃ ।
સત્યત્વમસ્તિ તસ્યૈવ ન તુ વિશ્વસ્ય કર્હિચિત્ ॥ ૧૩॥

કુરુતે હ્યસદેવાસત્ કરુણા પરમાત્મનઃ ।
નાન્યત્ કિઞ્ચન કર્તવ્યં સત્ય આત્મા સ એવ હિ ॥ ૧૪॥

સંવિદ્ભાનુરસાવાત્મા યદ્ભાસા માયિકં જગત્ ।
નીયતે નાશમત્યન્તં તમો ભાસા યથા રવેઃ ॥ ૧૫॥

અસદેવ તમો યદ્વત્ સત્યવદ્દૃશ્યતેઽબુધૈઃ ।
અસત્યૈવ તથા માયા સકાર્યા સત્યવન્મતા ॥ ૧૬॥

યથાઽસત્ત્વાત્ તમો ભાસા કબલીક્રિયતે રવેઃ ।
સકાર્યા ચ તથા માયા કબલીક્રિયતે ચિતા ॥ ૧૭॥

સ એવ શિષ્યતે તુર્યે ચિદાનન્દોઽદ્વિતીયકઃ ।
ન જીવો ન જગત્ કિઞ્ચિત્ તદ્દ્વયં ચ મૃષા કિલ ॥ ૧૮॥

દ્વિતીયશ્લોકઃ

ત્વય્યરુણાચલ સર્વં
ભૂત્વા સ્થિત્વા પ્રલીનમેતચ્ચિત્રમ્ ।
હૃદ્યહમિત્યાત્મતયા
નૃત્યસિ ભોસ્તે વદન્તિ હૃદયં નામ ॥

tvayi - in you; arunachala - O Arunachala; sarvam - all; bhutva - having come into existence; sthitva - having been sustained; pralinam - is destroyed; etat - this; chitram - picture; hridi – in the heart; aham - 'I'; iti - as; atmataya - as self, as spirit; nrityasi - you dance; bhoh - O [a form of address, linked to the word 'arunachala' in the first line]; te - to you; vadanti - they say; hridayam - heart; nama - name.

O Arunachala! In you all this picture comes into existence, is sustained, and is destroyed. You dance in the heart as self (or spirit) as 'I', [and hence] they say 'heart' is name to you.

દ્વિતીયશ્લોકાનુવાદઃ

ઉદેતિ વર્તતે પ્રલીયતેઽખિલં જગચ્ચલં
ત્વયિ પ્રકાશવત્પટે યથૈવ ચિત્રસન્તતિઃ ।
અહન્તયાઽઽત્મરૂપતોઽપિ નૃત્યસિ સ્વયં હૃદિ
વદન્ત્યતો હૃદાખ્યકં ભવન્તમેકકં પરમ્ ॥

In Thee arises, remains and vanishes all this moving world like a succession of the pictures on a lighted screen. Thou also dancest in the Heart as the Real Self as 'I'. Therefore, (the wise) speak of Thee, the One Supreme Being, as having the name "Heart."

વાર્ત્તિકમ્

બહવઃ પ્રતિબધ્યન્તે મન્વાનાઃ સદિદં જગત્ ।
આત્મનાશપદં કેચિદિદં મત્વા ચ બિભ્યતિ ।
શઙ્કાદ્વયનિરાસાય દ્વિતીયશ્લોક ઈરિતઃ ॥ ૧૯॥

તટસ્થલક્ષણં ચાત્ર દિશ્યતે પરમાત્મનઃ ।
સ્વરૂપલક્ષણં ચાપિ શુદ્ધં ભક્તિવિવૃદ્ધયે ॥ ૨૦॥

સ્વતઃ સત્યં જગન્મત્વા તસ્યાધિષ્ઠાનમવ્યયમ્ ।
ન પશ્યત્યવિવેકીતિ તત્તત્ત્વમુપદિશ્યતે ॥ ૨૧॥

જીવેશૌ વિષયાશ્ચેતિ ત્રિતયં જગદાખ્યકમ્ ।
આરોપિતમિદં સર્વમધિષ્ઠાને ચિદાત્મનિ ॥ ૨૨॥

સ્વરૂપં જગતઃ સત્યં સચ્ચિદાત્મૈવ કેવલઃ ।
અતોઽન્વેષેણ લબ્ધવ્યો વિહાયેદં સ એવ હિ ॥ ૨૩॥

દૃશ્યતે જગદિત્યેતત્ તત્સત્તાં નૈવ સાધયેત્ ।
અધિષ્ઠાનં કિમપ્યસ્તીત્યેતદેવ હિ સાધિતમ્ ॥ ૨૪॥

પ્રતીયતે યથા યદ્યત્ તત્ તથેત્યપ્રમાણકમ્ ।
વૈજ્ઞાનિકજનૈશ્ચાપિ સ્પષ્ટમેતન્નિરૂપિતમ્ ॥ ૨૫॥

બહિર્મુખતયા તે તુ ભેદજ્ઞાનપરાયણાઃ ।
ન સ્વં વેદિતુમિચ્છન્તિ જ્ઞાનં તેષામતો મૃષા ॥ ૨૬॥

સાક્ષાત્કૃતમધિષ્ઠાનં જગતો યેન બોધતઃ ।
પ્રમાણીકૃત્ય તદ્વાક્યં તથા નિષ્ઠાં લભેમહિ ॥ ૨૭॥

અધિષ્ઠાનસદદ્વૈતં નિર્વિશેષં નિરંશકમ્ ।
જગદ્રૂપતયા ભાતિ મનોવ્યાપારમાત્રતઃ ॥ ૨૮॥

મન એવ સ્વયં માયા યાઽન્યથા કુરુતે પરમ્ ।
જ્ઞાયતાં તદિદં સ્પષ્ટં સુપ્તૌ જગદભાનતઃ ॥ ૨૯॥

ઉદેતિ વર્તતે તસ્મિન્ લીયતે ચાખિલં યતઃ ।
સ એવાત્મા તતઃ સર્વં જીવેશૌ વિષયા અપિ ॥ ૩૦ ॥

માયાકાર્યમિદં યસ્માત્ કેવલોઽસાવવિક્રિયઃ ।
નાનેન બાધ્યતે કિઞ્ચિત્ પટશ્ચિત્રાગ્નિના યથા ॥ ૩૧ ॥

તદાભાસમયં ચેદં સ એવ પરમાર્થતઃ ।
યદેવાદ્યન્તયોરેતન્મધ્યે ચેદં તદેવ હિ ॥ ૩૨ ॥

વિશ્વં વિવેકદૃષ્ટ્યૈવં સ્વાત્મનિ પ્રવિલાપયેત્ ।
પ્રવિલાપનદૃષ્ટ્યા હિ સ્વાન્વેષણક્ષમં મનઃ ॥ ૩૩ ॥

સ્વાન્વેષણસ્ય ચાત્રૈવ પ્રકાર ઉપદિશ્યતે ।
તેન સ્વરૂપેઽવસ્થાનં જગદ્ભ્રમવિનાશતઃ ॥ ૩૪ ॥

તટસ્થલક્ષણં દિષ્ટમેવં તસ્ય પરાત્મનઃ ।
સ્વરૂપલક્ષણં ત્વત્ર સૂચિતં ચોપલક્ષ્યતે ॥ ૩૫ ॥

સ્વરૂપં તત્ સ્ફુટીકુર્વન્ શિવસ્ય પરમાત્મનઃ ।
તસ્યૈવાત્મત્વમસ્માકં દર્શયત્યતિશોભનમ્ ॥ ૩૬ ॥

આત્મત્વેનાખિલસ્યાન્તરહમિત્યનિશં સ્વયમ્ ।
ભાત્યસૌ નાન્ય આત્માઽસ્તિ સ્વરૂપં તદિદં વિભોઃ ॥ ૩૭ ॥

નૃત્યસીતિ પદેનાત્ર દિષ્ટાઽઽનન્દસ્વરૂપતા ।
આત્મભૂતસ્ય તુર્યસ્ય તદસંસારિતાઽઽત્મનઃ ॥ ૩૮ ॥

સ્વયૈવ માયયા દેવો વિમોહિત ઇવ સ્વયમ્ ।
ભ્રમતીવાત્ર સંસારે માયાઽસૌ ન તુ વિદ્યતે ॥ ૩૯ ॥

અર્થાદ્વ્યાવર્તનં ચાપિ દેહાદીનામનાત્મનામ્ ।
કૃતમેવેત્યતસ્તેષુ જહ્યાદાત્મત્વભાવનામ્ ॥ ૪૦ ॥

સર્વે વયં સ એવ સ્મો ન દેહા નાપિ દેહિનઃ ।
નાજ્ઞાનં ન ચ સંસાર ઇત્યેષા પરમાર્થતા ॥ ૪૧ ॥

મનઃ કલ્પયતે દેહાન્ જીવાંશ્ચ વિષયાનહો ।
જાગ્રત્યપિ યથા સ્વપ્ને માયૈષા મન એવ હિ ॥ ૪૨ ॥

શુદ્ધચિદ્રૂપ આત્મૈવ સત્યો નાન્યસ્તતઃ શિવઃ ।
એષ વેદાન્તસિદ્ધાન્ત ઉક્તઃ સ્વીયાનુભૂતિતઃ ॥ ૪૩ ॥

પ્રેષ્ઠ આત્મૈવ સર્વેષાં તદર્થમિતરત્ પ્રિયમ્ ।
અત આનન્દરૂપત્વમાત્મનો ગમ્યતે સ્ફુટમ્ ॥ ૪૪॥

તદાનન્દકણા એવ હ્યાનન્દા લૌકિકાઃ સ્મૃતાઃ ।
આત્મલાભસમો નાસ્તીત્યત એવોચ્યતે બુધૈઃ ॥ ૪૫॥

બહિર્મુખત્વહાનાય દિશ્યતે હૃદિ તત્સ્થિતિઃ ।
અન્તર્મુખતયા હ્યેવ સાધને સમ્પ્રવર્તનમ્ ॥ ૪૬॥

પરમાર્થતયા ત્વેષ પરમો હૃદયં સ્વયમ્ ।
સર્વાધારસ્ય સત્યસ્ય મિથ્યૈવાધારકલ્પના ॥ ૪૭॥

તૃતીયશ્લોકઃ

અહમિતિ કુત આયાતી-
ત્યન્વિષ્યાન્તઃ પ્રવિષ્ટયાઽત્યમલધિયા ।
અવગમ્ય સ્વં રૂપં
શામ્યત્યરુણાચલ ત્વયિ નદીવાબ્ધૌ ॥

aham - 'I'; iti - as; kutah - from where; ayati - does it come; iti - thus; anvishya – having sought; antah - within; pravishtaya - having entered; ati - very; amala - blemishless; dhiya – by mind; avagamya - having known; svam - one's own; rupam - form; œamyati - becomes still; arunachala - O Arunachala; tvayi - in you; nadi - river; iva - like; abdhau - in the ocean.

O Arunachala! By a very blemishless mind having sought thus, "From where does it 7come as 'I'?", having entered within, and having known one's own form, one becomes still in you, like a river in the ocean.

તૃતીયશ્લોકસ્યાનુવાદઃ

ઉદેત્યહં કુતસ્સ એષ ઇત્યતીવ શુદ્ધયા
ધિયા હૃદિ પ્રવિષ્ટયા વિમૃગ્ય તત્ત્વમાત્મનઃ ।
અવૈતિ ચેચ્ચિદાત્મકં ભવન્તમાત્મરૂપતો
નદીવ સઙ્ગતાઽમ્બુધિં ત્વયિ પ્રશાન્તિમેતિ ધીઃ ॥

Searching for the Truth of oneself, with the exceedingly pure mind diving into the Heart to find "Whence arises this I", if one has the Experience of Thee as the Self who

is Pure Consciousness, then the mind becomes forever still in Thee like the river that has joined the ocean.

વાર્ત્તિકમ્

જ્ઞાત્વૈવમાત્મલાભાય યતમાનસ્ય સિદ્ધયે ।
ઋજુમાર્ગસ્તૃતીયેન વિસ્પષ્ટમુપદિશ્યતે ॥ ૪૮॥

આભાસમાત્રો જીવોऽયં ચિજ્જડગ્રન્થિરૂપકઃ ।
તચ્ચિદંશનિદાનં તુ ભવત્યાત્મા પરઃ સ્વયમ્ ॥ ૪૯॥

હિત્વા જડાંશં દેહાદિ શિષ્ટાં ચૈતન્યરૂપિણીમ્ ।
શુદ્ધાહન્તાં સમાદાય તન્મૂલં સ્વં ગવેષયેત્ ॥ ૫૦॥

નિમજ્જેત્ સલિલે લબ્ધું મગ્નં વસ્તુ યથા તથા ।
અહન્તામૂલમન્વિષ્યન્ નિમજ્જેત્ સાધકો હૃદિ ॥ ૫૧॥

સ્વામિનો ગન્ધમાદાય યથા શ્વા તં ગવેષયેત્ ।
શુદ્ધાહન્તાં તથાऽऽદાય ધીઃ સ્વમૂલં ગવેષયેત્ ॥ ૫૨॥

ગવેષણે સ્થિરીભૂતં મનો વિશતિ હૃદ્ગુહામ્ ।
તદા ભાયાત્ સ્વભાસાऽऽત્મા શામ્યેદપિ મનોऽન્તતઃ ॥ ૫૩॥

મનોનાશાદપાર્થક્યં સ્વતઃ સિદ્ધં પ્રકાશતે ।
મનઃકૃતો હિ ભેદોऽયં દ્વયોર્બ્રહ્માત્મનોરિહ ॥ ૫૪॥

ઇદમન્વેષણાત્ સ્વસ્ય તત્ત્વસ્ય હૃદિ મજ્જનમ્ ।
સાધનં પરમં મુક્તેર્વિચાર ઇતિ ચોચ્યતે ॥ ૫૫॥

અત્યન્તૈક્યમનાવૃત્તિં દર્શયિષ્યન્નતો ગુરુઃ ।
નદીં દૃષ્ટાન્તયત્યબ્ધિં ગત્વા તદ્રૂપતાં ગતામ્ ॥ ૫૬॥

આત્માનુભૂતિરેષૈવ મુક્તિરિત્યભિધીયતે ।
સત્યા સ્થિતિઃ પરં ધામ કૈવલ્યં સહજા સ્થિતિઃ ॥ ૫૭॥

સ્વજ્ઞાનમમૃતત્વં ચ મૌનં નિર્ભયતેત્યુત ।
સ્થિતિમેતાં પરાં તુર્યાં શંસન્તિ બહુધા બુધાઃ ॥ ૫૮॥

આત્મા તુ જ્ઞેયતાં નૈતિ તુર્યે જ્ઞાતાऽપિ નાસ્તિ હિ ।
જ્ઞાનાજ્ઞાનવિનિર્મુક્ત આત્મા જ્ઞાનસ્વરૂપકઃ ॥ ૫૯॥

જ્ઞેયજ્ઞાતૃવિહિનોऽસાવાત્મા ભવતિ કેવલઃ ।

અનાત્મન્યાત્મધીનાશઃ સ્વાત્મજ્ઞાનમિતીર્યતે ॥ ૬૦॥

નષ્ટં યસ્ય વિચારેણ મનો હૃદિ નિમજ્જનાત્ ।
આત્મૈવ સ હિ નાત્મજ્ઞો બ્રહ્મૈવ બ્રહ્મવિન્નહિ ॥ ૬૧॥

બ્રહ્મબ્રહ્મજ્ઞયોર્ભેદં મન્વાનઃ પારમાર્થિકમ્ ।
મિથ્યાગ્રહેણ તેનૈવ પ્રતિબધ્યેત સાધકઃ ॥ ૬૨॥

જ્ઞાનાદ્વિમુક્તિરિત્યુક્તેર્જ્ઞાનમિત્યર્થ એવ હિ ।
ન જ્ઞાનં કારણં મુક્તેર્મુક્તિર્જ્ઞાનફલં ચ ન ॥ ૬૩॥

આત્મનઃ સહજા મુક્તિઃ સ્વરૂપં જ્ઞાનમાત્મનઃ ।
સ મુક્તિર્નિત્યસિદ્ધૈવ સ્વયમેવ સ્વકારણમ્ ।
વ્યાવહારિકદૃષ્ટ્યા તુ જ્ઞાનાન્મુક્તિરિતીર્યતે ॥ ૬૪॥

ન વક્તું નાપિ મન્તું વા શક્યમેતત્ પરં પદમ્ ।
મૌનવ્યાખ્યાનનિર્દેશ્યં વેદ્યં ચ સ્વાનુભૂતિતઃ ॥ ૬૫॥

ન વક્તા ન ચ મન્તા વા તત્ર કશ્ચન શિષ્યતે ।
અત એતત્ પદં તુર્યં મૌનમિત્યભિધીયતે ॥ ૬૬॥

વાચોઽપિ મનસા સાકં નિવર્તન્તે યતોઽદ્વયાત્ ।
અનુભૂય તમાનન્દં ન બિભેતિ કુતશ્ચન ॥ ૬૭॥

યત્રાસ્તિ ભેદવિજ્ઞાનં નાભીતિસ્તત્ર કર્હિચિત્ ।
ઇતિ ચ શ્રૂયતે યસ્માત્ તુર્યમેવાભયં પદમ્ ॥ ૬૮॥

સ્વસ્વરૂપપરિજ્ઞાનાત્ કથમૈક્યં પરાત્મના ।
ઇતિ પ્રશ્નો નિરાધાર ઐક્યં સ્વાભાવિકં યતઃ ॥ ૬૯॥

અત્રોક્તેન વિચારેણ લભ્યૈષા પરમા ગતિઃ ।
નાન્યથા લભ્યતે સેયમિતિ વેદાન્તનિર્ણયઃ ॥ ૭૦॥

ઇહ દિષ્ટઃ સ એવાર્થો નદીદૃષ્ટાન્તયોજનાત્ ।
અન્યત્રાનેકધા ચાપિ સ્પષ્ટં ભગવતા સતામ્ ॥ ૭૧॥

નોપાસનેન યોગેન પુણ્યૈર્વાઽપિ ચ કર્મભિઃ ।
લભ્યેતેદં પદં તુર્યમિત્યેવં ચ પ્રદર્શિતમ્ ॥ ૭૨॥

મિથ્યેયં જીવતા યાવન્ન લુપ્યેત વિચારણાત્ ।
તાવત્ સંસારનિર્મોક્ષો ન ભવેત્ કિલ દેહિનામ્ ॥ ૭૩॥

જીવત્વમાદિમો ધર્મઃ કર્તૃત્વાદ્યાસ્તદાશ્રયાઃ ।
જીવતાઽઽરોપિતા પૂર્વં કર્તૃત્વાદ્યાસ્તતઃ પરમ્ ।
જીવત્વનાશે સર્વેષાં નાશોઽતઃ સહજા સ્થિતિઃ ॥ ૭૪ ॥

સર્વધર્મપરિત્યાગો યો ગીતાસુ વિધીયતે ।
કર્તૃત્વાદિકહાનં સ જીવત્વત્યાગપૂર્વકમ્ ॥ ૭૫ ॥

સર્વધર્મપરિત્યાગો જીવત્વત્યાગ એવ હિ ।
અત્યાગે જીવતાયાસ્તુ ત્યક્તો ધર્મો ન કશ્ચન ॥ ૭૬ ॥

ઇત્યૌપનિષદં સ્વાસ્થ્યં પરમં પદમવ્યયમ્ ।
અત્રોપદિષ્ટં દ્રષ્ટવ્યમદ્વૈતં તુર્યનામકમ્ ॥ ૭૭ ॥

ઋજુમાર્ગમિમં હિત્વા ચરન્ત્યન્યપથા તુ યે ।
કાલેન પરમં ધામ યાન્તિ તે હૃન્નિમજ્જનાત્ ॥ ૭૮ ॥

ચતુર્થશ્લોકઃ

ત્યક્ત્વા વિષયં બાહ્યં
 રુદ્ધપ્રાણેન રુદ્ધમનસાઽન્તસ્ત્વામ્ ।
ધ્યાયન્પશ્યતિ યોગી
 દીધિતિમરુણાચલ ત્વયિ મહીયં તે ॥ ૪ ॥

tyaktva - having given up; vishayam - objects; bahyam - external; ruddha - restrained; pranena - by the breath; ruddha - restrained; manasa - by the mind; antah - within; tvam - you; dhyayan - having meditated; paœyati - sees; yogi - yogi; didhitim - light; arunachala – O Arunachala; tvayi - in you; mahiyam - are exalted; te - they.

O Arunachala! Having given up external objects and having meditated upon you within by a mind restrained by the restrained breath, the yogi sees the light. They are exalted in you.

ચતુર્થશ્લોકસ્યાનુવાદઃ

વિહાય બાહ્યવસ્તુ વાયુરોધનાન્મનો હઠા-
ન્નિરુધ્ય યોગગસ્સ્મરન્ ભવન્તમેવ સર્વદા ।
મહિમ્નિ લીનધીઃ પ્રભે ક્ષણેન મોદતે ભૃશં
અથોત્થિતસ્સ વાસનેન ચેતસા તુ સંસરેત્ ॥

Giving up external objects and quelling the mind by force - by stilling of the breath - and ever meditating on Thee, the Yogi, with his mind merged in Thy Glory, sees the Light (of Consciousness) and is very happy for the time being. But, getting out (of the State) with the mind and it's Vasanas (tendencies toward the world), he returns to Relativity.

વાર્ત્તિકમ્

શિષ્યેતે યતમાનૌ દ્વૌ યોગી પ્રેમી પરાત્મનિ ।
ચતુર્થે યોગિનં વક્તિ પ્રેમિણં પઞ્ચમે ગુરુઃ ॥ ૭૯॥

તત્ર યોગી હઠાદ્રુદ્ધ્વા પ્રાણાયામેન માનસમ્ ।
ચિજ્જ્યોતિર્વીક્ષણં લબ્ધ્વા તદાનીં મોદતે ભૃશમ્ ॥ ૮૦॥

મનોરોધો હઠાત્ સિદ્ધો ન સ્થિરો ભવિતા ક્વચિત્ ।
લીનમેવ મનસ્તિષ્ઠેત્ સવાસનમથોદિયાત્ ॥ ૮૧॥

મનોનાશેન મુક્તિર્હિ ન લયેન કદાચન ।
લીનં હિ પુનરાયાતિ નષ્ટં નૈવોદિયાત્ પુનઃ ।
અનાશાન્મનસો યોગી જીવત્વં ન જહાતિ હિ ॥ ૮૨॥

સ્ફુટીકર્તુમિમં ભેદં મનસો લયનાશયોઃ ।
ગુરુર્વક્તિ પુરાવૃત્તાં કથાં કસ્યાપિ યોગિનઃ ॥ ૮૩॥

સમાધેર્વ્યુત્થિતો યોગી પિપાસાર્દિતમાનસઃ ।
શિષ્યમાદિશ્ય તીર્થાય સમાધિં પ્રાવિશત્ પુનઃ ॥ ૮૪॥

યયુઃ શતાનિ વર્ષાણાં વ્યુત્થિતોऽભૂત્ તતઃ પરમ્ ।
જલાથપ્રેષિતં શિષ્યં વેગેનાથ સ્મરંસ્તદા ।
ઉવાચોચ્ચૈશ્ચ ભોસ્તીર્થં કિમાનીતં ત્વયેત્યસૌ ॥ ૮૫॥

પિપાસાવાસનાયુક્તં મનો લીનં હ્યભૂચ્ચિરમ્ ।
ઉદિયાય ચ વેગેન સમાધેર્વ્યુત્થિતસ્ય હિ ।
અનાશાન્મનસો હ્યેવં વેગેન સ્મૃતિરુદ્ગતા ॥ ૮૬॥

મહિમ્નિ રમતે યોગી ન સ્વરૂપં પ્રપદ્યતે ।
ઇત્યુક્ત્યા યોગિનો ભોગો દિશ્યતે ન તુ મોક્ષણમ્ ॥ ૮૭॥

અલ્પમપ્યન્તરં કૃત્વા ભયમેતીતિ ચ શ્રુતેઃ ।

નાભયં વિન્દતે યોગીત્યયમર્થો નિરૂપિતઃ ॥ ૮૮॥

વિના વિવેકમત્રોક્તં સ્વશક્ત્યા ચ હઠેન ચ ।
યતમાનો હિ દિષ્ટોઽત્ર ન તુ સર્વોઽપિ યોગગઃ ॥ ૮૯॥

યાવન્ન સજ્જતે સોઽયં વિચારેઽહઙ્કૃતિં ત્યજન્ ।
પરં વા શરણં યાતિ તાવન્નાયં વિમુચ્યતે ॥ ૯૦॥

પઞ્ચમશ્લોકઃ

ત્વય્યર્પિતમનસા ત્વાં
પશ્યન્સર્વં તવાકૃતિતયા સતતમ્ ।
ભજતેઽનન્યપ્રીત્યા
સ જયતરુણાચલ ત્વયિ સુખે મગ્નઃ ॥ ૫॥

tvayi - in you; arpita - surrendered; manasa - by mind; tvam - you; paœyan - seeing; sarvam - all, everything; tava - your; akrititaya - as form; satatam - always; bhajate - who worships; ananya - otherless; pritya - by love; sah - he; jayati - triumphs; arunachala - O Arunachala; tvayi - in you; sukhe - in bliss; magnah - having drowned

O Arunachala! Seeing you by mind surrendered in you, he who by otherless love always worships everything as your form, triumphs having drowned in bliss in you.

પઞ્ચશ્લોકસ્યાનુવાદઃ

ત્વદર્પિતેન ચેતસાઽનુરક્તમાનસસ્ત્વયિ
ત્વદાકૃતિત્વતોઽખિલં જગત્સમીક્ષ્ય સર્વદા ।
અનન્યભક્તિયોગતો ભજન્સુખામ્બુધૌ ત્વયિ
નિમગ્નધીર્જયત્યસૌ સ ઉત્તમો હિ યોગિષુ ॥

He that loves Thee, having his mind absorbed in Thee, ever seeing all the world as forms of Thee, and cherishing Thee with undivided love, excels (all other yogis), being merged in Thee, the Sea of Bliss. He is indeed the best of yogis.

વાર્ત્તિકમ્

અતો વિશિષ્યતે પ્રેમી તદર્પિતમનાઃ સદા ।
વિસ્મૃત્ય સ્વં ચ તત્પ્રેમ્ણા વીક્ષતે તન્મયં જગત્ ॥ ૯૧॥

" યો માં પશ્યતિ સર્વત્ર સર્વં ચ મયિ પશ્યતિ ।

તસ્યાહં ન પ્રણશ્યામિ સ ચ મે ન પ્રણશ્યતિ" ॥ ૯૨॥

" યોગિનામપિ સર્વેષાં મદ્ગતેનાન્તરાત્મના ।
શ્રદ્ધાવાન્ ભજતે યો માં સ મે યુક્તતમો મતઃ" ॥

ઇતિ ગીતાસુ સન્દિષ્ટં પારમ્યં પ્રેમિણઃ કિલ ॥ ૯૩॥

પશ્યંસ્તં સ સદા પ્રેષ્ઠં તદાનન્દે નિમગ્નધીઃ ।
મુક્તપ્રાયો હ્યસૌ કાલાન્મુક્તિમાત્યન્તિકીં વ્રજેત્ ॥ ૯૪॥

ભક્તિયોગેન લભ્યેત પરસ્મિન્ પ્રેમ શોભનમ્ ।
ઉક્તા ભાગવતે ભક્તિર્નવધા શ્રવણાદિકા ।
પ્રપત્તિર્નવમા તત્તુ પરસ્મૈ સ્વનિવેદનમ્ ॥ ૯૫॥

" દૈવી હ્યેષા ગુણમયી મમ માયા દુરત્યયા ।
મામેવ યે પ્રપદ્યન્તે માયામેતાં તરન્તિ તે" ॥

ઇત્યુપાયઃ પ્રપત્તિર્હિ માયામોક્ષાય દિશ્યતે ॥ ૯૬॥

માયયા વિષયેષ્વેવ પ્રીતિઃ સઞ્જાયતે નૃણામ્ ।
પ્રપન્નો માયયા મુક્તઃ પરસ્મિન્ પ્રેમવાન્ ભવેત્ ॥ ૯૭॥

અતઃ પરસ્મિન્ કર્તવ્યા ભક્તિઃ પરમશોભના ।
આત્મત્વેન પૃથક્ત્વેન કથઞ્ચિત્ પરમં ભજેત્ ॥ ૯૮॥

ભજનાત્ પ્રેમ્ણિ સઞ્જાતે પાર્થક્યં સ્રંસતે ચિરાત્ ।
અભેદઃ શિષ્યતે સત્ય એવં ભક્તઃ કૃતી ભવેત્ ॥ ૯૯॥

પ્રેમવાઞ્જયતીત્યુક્ત્યા યોગિભ્યોઽસૌ વિશિષ્યતે ।
અતો વિચારે નો ચેદ્ધીરિચ્છેત્ પ્રેમ્ણાઽમુમીશ્વરમ્ ॥ ૧૦૦॥

સ્તોત્રસમુદાયાર્થઃ

" ન હિ જ્ઞાનેન સદૃશં પવિત્રમિહ વિદ્યતે" ।
ઇતિ પૂર્વોક્તમેવાર્થમિવ દર્શયતિ સ્વયમ્ ॥ ૧૦૧॥

વૃદ્ધ ઇત્યુચ્યતે જ્ઞાની પ્રેમી બાલ ઇતીર્યતે ।
અહઙ્કારપરીતાત્મા યોગી પ્રોક્તો યુવેતિ ચ ॥ ૧૦૨॥

અત્ર યૌવનમેવાદ્યં તતો બાલત્વવૃદ્ધતે ।
સાહઙ્કારત્વમેવાદૌ નિરહઙ્કારતા પરા ।

યોગાદ્ભક્તિસ્તતઃ પ્રેમ તતો જ્ઞાનમિતિ ક્રમઃ ॥ ૧૦૩॥

ઉત્તમો ભવતિ જ્ઞાની નિકૃષ્ટો યોગતત્પરઃ ।
મધ્યમો ભવતિ પ્રેમી તેષામેવં ભિદા મતા ॥ ૧૦૪॥

મોક્ષકારણસામગ્ર્યાં ભક્તિરેવ ગરીયસી ।
ભક્તિપ્રકારે સર્વસ્મિન્ વિચારઃ પરમોત્તમઃ ॥ ૧૦૫॥

વિચારેણાન્નતાં યાતિ પરમસ્ય સ્વયં હૃદિ ।
વિચારી પરમો ભક્તો જ્ઞાત્વૈવં સ્વં વિચારયન્ ॥ ૧૦૬॥

વિચારેણૈવ સમ્પૂર્ણં પરસ્મૈ સ્વનિવેદનમ્ ।
વિચારેણાન્નતામેત્ય ન તતો ભિદ્યતે યતઃ ॥ ૧૦૭॥

મઙ્ગલમ્
ઈશ્વરો ગુરુરાત્મેતિ મૂર્તિભેદવિભાગિને ।
પરસ્મૈ રમણાખ્યાય પઞ્ચરત્નકૃતે નમઃ ॥ ૧૦૮॥

ઇતિ શિવમ્

In another Ashram publication, there is an addition of another verse (as below) one of Ganapati Muni's disciples, Daivarata, wrote a Tamil verse and colophon in praise of the stotra.
Maharshi translated this in Sanskrit. The original pancharatna was composed by Maharshi in Tamil and also translated by him into Sanskrit.

એતદ્ રમણ મહર્ષેર્દર્શનમરુણાચલસ્ય દેવગિરા ।
પઞ્ચકમાર્યાગીતૌ રત્નં ત્વિદમૌપનિષદં હિ ॥

ઇતિ શ્રી પારાશર્યસ્ય ભગવતો મહર્ષેરાચાર્ય
રમણસ્ય દર્શનમરુણાચલપઞ્ચરત્નમ્ ॥

Encoded and proofread by Sunder Hattangadi

This work is published by Sri Ramanasramam www.sriramanamaharshi.org
It has been approved to be posted on sanskritdocuments.org
by permission of Sri V.S. Ramanan, President, Sri Ramanasramam.

*Arunachala Pancharatna Varttikam*

pdf was typeset on June 13, 2024

Please send corrections to *sanskrit@cheerful.com*